श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमाला - १८

# भारतीयदर्शनसिद्धान्तप्रभा

प्रधानसम्पादकः

**प्रो. गोपबन्धुमिश्रः**

कुलपतिः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

सम्पादिका

**डॉ. बी. उमामहेश्वरी**

सहायिकाचार्या

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्,

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्- गुजरातम्

प्रकाशकः -

डॉ. दशरथजादवः
कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी,
राजेन्द्रभुवन रोड, वेरावलम् - ३६२ २६६
गीर-सोमनाथजनपदम्, गुजरातराज्यम्
दूरभाषः - ०२८७६ - २४४५३२, फेक्सः २४४४१७
E-mail: sssu.veraval@gmail.com
Web: www.sssu.ac.in

सहायकसम्पादकः समन्वयकश्च

डॉ. कार्तिकपण्ड्या
संशोधनाधिकारी,
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

© *Shree Somnath Sanskrit University, 2020*

| | | |
|---|---|---|
| संस्करणम् | - | प्रथमम् |
| वर्षम् | - | मार्च -२०२० |
| प्रतिकृतयः | - | ३५० |
| ISBN | - | 978-93-83097-35-7 |
| मूल्यम् | - | ₹५१०/- |
| मुद्रकः | - | जलाराम ग्राफिक्स एन्ड ऑफसेट<br>परमहंस एपार्टमेन्ट के पास, होटेल कावेरी के पीछे,<br>एस. टी. रोड, वेरावल-३६२ २६६,<br>जि. गीर-सोमनाथ, गुजरात (भारत)<br>दूरभाष - ०२८७६-२२१८६१ |

## विषयसूची


| क्र.सं. | विषयः | नाम | पृष्ठं |
|---|---|---|---|
| १. | संस्कृतवाङ्मये दार्शनिकसिद्धान्ताः | प्रो० उमाशङ्कर शर्मा "ऋषि" | ०१ |
| २. | साङ्ख्ययोगयोरीश्वरविमर्शः | प्रो० कृष्णकान्त शर्मा | २१ |
| ३. | शब्दार्थसम्बन्धानां नत्यत्वविमर्शः | प्रो० विनोदकुमार झा | ३५ |
| ४. | व्यवहारे सर्वे चार्वाकाः | प्रो० अर्चनाकुमारी दुबे | ४८ |
| ५ | स्वप्नवासवदत्ते दार्शनिकविचाराः | प्रो० महेन्द्रकुमार अं. दवे | ५१ |
| ६. | श्रीमद्भागवतमहापुराणे तृतीयैकादश-स्कन्धयोः साङ्ख्यदर्शनम् | डॉ० पङ्कजकुमार एस. रावल | ५५ |
| ७. | अभिज्ञानशाकुन्तले कर्मणःसिद्धान्तः | डॉ० डायालाल एम्. मोकरिया | ६६ |
| ८. | दर्शनेषु निहितयोः कर्मपुनर्जन्म-सिद्धान्तयोः वैदिकी अवधारणा | डॉ० भावप्रकाश गान्धी | ७३ |
| ९. | दर्शनशास्त्रेषु वेदस्याऽपौरुषेयत्वविचारः | डॉ० शत्रुघ्न पाणिग्राही | ८३ |
| १०. | आधुनिकपरिप्रेक्ष्ये कालः एकं चिन्तनम् | डॉ० बी. उमामहेश्वरी | ९५ |
| ११. | अद्वैतवेदान्ते मातृकाग्रन्थाः कैवल्यदीपिका च | डॉ० जानकीशरण आचार्य | १०२ |
| १२. | नास्तिकदर्शनेषु बौद्धदर्शनपरिचयः | भगीरथ आर्.त्रिवेदी | १२४ |
| १३. | ज्ञानकर्मानुगृहीता भक्तिरेव मोक्षकरी | चिन्तनः दि.जोषी | १३६ |
| १४. | कठकण्ठरवायितः अव्यक्तशब्दार्थपरामर्शः | साधु मङ्गलवर्धनदास | १४५ |
| १५. | न्यायनये पारिभाषिकशब्देषु लक्षणदोषाः | अपूर्वा भारद्वाज | १६० |
| १६. | वैशेषिकदर्शनस्य महत्त्वम् | राहुल कुमार झा | १७० |
| १७. | साङ्ख्यदर्शनस्य वैशिष्ट्यम् | किञ्जल गोरफाड | १७३ |
| १८. | श्रीहरिवाक्यसुधासिन्धौ पञ्चानाम् अनादितत्त्वानां विमर्शः | श्रीमती नम्रता पटेल | १७७ |
| १९. | वेदान्तदर्शने अविद्याविचारः | रविशङ्कर महापात्र | १८८ |
| २०. | श्रीमद्भगवद्गीता का अक्षरपुरुषोत्तम स्वामिनारायणभाष्य एक प्राथमिक आलोचन | प्रो० वसन्तकुमार म. भट्ट | १९२ |

# दर्शनशास्त्रेषु वेदस्याऽपौरुषेयत्वविचारः

**डॉ. शत्रुघ्नपाणिग्राही**
सहायकाचार्यः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्।

प्राचीनकालादेव समेषां महर्षीणां मुनीनां विदुषां चाभिमतमासीत् यद् वेदोऽपौरुषेयः। साम्प्रतमपि सर्वे मन्यन्ते वेदोऽपौरुषेयो वर्तते इति। पुरुषेण कृतः पौरुषेयः, न पौरुषेयेति अपौरुषेयः तस्य भावः अपौरुषेयत्वम्। प्राचीनभारतीयार्षसम्प्रदाये बद्धमूलो विश्वासो विद्यते यत् वेदः परब्रह्मस्वरूपः, परमात्मनः निःश्वासभूतः प्राणभूतश्च। सृष्ट्यादौ परमात्मनो निःश्वासात् निर्गतो ज्ञानराशिः ऋषिभिः दृष्टः। अतः 'ऋषयो मन्त्रद्रष्टारः'[१] इति निगद्यन्ते। 'साक्षात् कृतधर्माणो ऋषयो बभूवुः'[२] इति आचार्ययास्कः। अस्मिन् सन्दर्भे वेदभाष्यकारः आचार्यसायणः ऋग्वेदभाष्यभूमिकायां कथयति-

**यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।**
**निर्ममे तमहं वन्दे विद्यातीर्थं महेश्वरम् ॥[३] इति ।**

यथेश्वरः अनादिः अनन्तः अविनाशी च तथैव वेदः। सृष्ट्यादौ भगवतो निश्वासात् वेदाः निर्गताः[४], तेभ्यो अखिलजगतो ब्रह्मणा सृष्टिः कृता। यदा ऋषयो तपसः बलेन मन्त्राणां दर्शनं कृतवन्तः तदा गुरुशिष्यपरम्परया श्रुतिपरम्परया च अग्रे अन्ये पठितवन्तः। सृष्टिकर्ता परमात्मा प्रारम्भे काले

---

१ निरुक्तम् – दुर्गवृत्ति - २/११
२ निरुक्तम् – १/६
३ ऋग्वेदभाष्यभूमिकायाः मङ्गलाचरणे।
४ एवं वा अरे अस्य महतो भूतस्य निःश्वसितमेतद् यद् ऋग्वेदो यजुर्वेदः सामवेदो अथर्वाङ्गिरसः – शतपथ. १४/५/४/१०

सुव्यवस्थायै सृष्टेः प्राक् धर्मस्यावश्यकतां विचार्य ब्रह्मणे वेदस्य ज्ञानं दत्तवान्। श्रूयते श्वेताश्वतरोपनिषदि यथा – यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश प्रहिणोति तस्मै।[5] दर्शनेन श्रवणेनैव वेदः प्राप्तः, अतोऽपौरुषेयः। ऋग्वेदसंहितायां श्रूयते–'वाचा विरूप नित्यया'.[6] इति। बृहदारण्यकोपनिषदि वर्णनम् आयाति यत् –

'अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदोयजुर्वेदः सामवेदोऽथर्वाङ्गिरसः'.[7] इति। परन्तु केचन पाश्चात्यविद्वांसः दार्शनिकाश्च वेदस्याऽपौरुषेयत्वं नाङ्गीकुर्वन्ति। तेषां मतानुसारं यथा लौकिककाव्यानि शास्त्राणि च केनापि पुरुषेण विरचितानि भवन्ति तथैव वेदाः केनापि पुरुषेण विरचिताः वर्तन्ते। ते स्वकीयबुद्धिवैभबानुसारं वेदस्य पौरुषेयत्वं सिद्धं कर्तुमिच्छन्ति।

दर्शनशास्त्रदृष्ट्या यदि वयं पश्यामश्चेत् जैमिनीयन्यायमालायां पूर्वपक्षः कथयति–वेदांश्चैके सन्निकर्षं पुरुषाख्या.[8] इति। अर्थात् कालिदासादिभिर्निर्मितानां रघुवंशादिग्रन्थवत् वेदा अपि पौरुषेयाः न तु अपौरुषेयाः यतोहि वेदकर्तृत्वे पुरुषा आख्यायन्ते। वैयासिकं भारतं वाल्मिकीयं रामायणमित्यत्र यथा भारतादि कर्तृत्वेन व्यासादय आख्यायन्ते तथैव काठकं कौथुमं तैत्तिरीयमित्येवं तत्तद्वेदशाखाकर्तृत्वेन कठादीनाम् आख्यातत्वात् वेदाः पौरुषेयाः। पुनश्च कथ्यते प्रकृते अपौरुषेयत्वं नाम शरीरधारिजीवनिर्मित्वाभावरूपः, तथा च मन्वादिस्मृतयः शरीरधारिजीवनिर्मिताः, वेदस्तावत् शरीर-धारिजीवनिर्मितो न अस्ति, अतो वेदे आगमप्रमाणलक्षणं सम्भवतीति चेत् इत्यपि वक्तुं न शक्यते। कुत इति चेत् परमेश्वरस्यापि

---

[5] श्वेताश्वेतरोपनिषदि - ६/१८

[6] ऋग्वेदः – ८/७५/६

[7] बृ.उप. - २/४/१०

[8] जैमिनीयन्यायमाला - १/१/२७

पुरुषसूक्तानुसारं शरीरं विद्यते।[९] यदि अपौरुषेयत्वस्य पुनः कर्मफलरूपशरीरधारिजीवनिर्मितत्वा-भावरूपत्वं लक्षणं स्वीक्रियते, तथा च ईश्वरशरीरस्य कर्मफलरूपशरीरधारि-जीवनिर्मितत्वाभात् अपौरुषेयत्वं तत्र संगच्छति इति वक्तुमपि नैव शक्यते, यतो वेदानामुत्पत्तिः अग्निवाय्वादि-जीवविशेषैः सञ्जाता विद्यते। तथा चात्र श्रुतिप्रमाणम्–"ऋग्वेद एवाग्नेरजायत यजुर्वेदो वायोः सामवेद आदित्यात्".[१०] इति। अनेनाधारेण शङ्का भवति वेदः पौरुषेयः अपौरुषेयः वा ? एतस्य समाधानाय सिद्धान्तपक्षः सिद्धान्तयति नित्यानां वेदानां सम्प्रदायप्रवर्त्तकत्वेन एव काठकादि आचार्याणां नामानि श्रूयन्ते न तु कर्तृत्वेन।

पुनश्च पूर्वपक्षः प्रतिपादयति- 'अनित्यदर्शनाच्च'.[११]। अर्थात् वेदे जननमरणवन्तो बबरादयः.[१२] श्रूयन्ते। बबरादिभ्यः पूर्वमभावाद् अनित्या वेदाः। तत्र सिद्धान्तपक्षः सिद्धान्तयति–'परं तु श्रुतिसामान्यमात्रम्'.[१३] इति। अत्र बबरादिकं तच्छब्दसामान्यमेव। न तु मनुष्यो बबरनामकोऽत्र विवक्षितः बबरध्वनियुक्तस्य प्रवहणस्वभावस्य वायोरत्र वक्तुं शक्यत्वात्।

वेदशब्दस्य अर्थत एव वेदस्य नित्यत्वं सिद्ध्यति। यथा विद्यते त्रिकालं यावत् इति वेदः। वेदशब्दस्य चत्वारः व्युत्पत्त्यर्थाः भवन्ति। तेषु 'विद्सत्तयाम्'.[१४] इति पाणिनीयव्याकरणानुसारं वेदस्य नित्यत्वं सिद्ध्यति। भगवता बादरायणेनापि वेदस्य नित्यत्वं स्वीकृत्य 'शास्त्रयोनित्वात्'.[१५] इति

---

[९] सहस्रशीर्षा पुरुषः - ऋग्वेदः – १०/९०/१

[१०] ऐतरेयब्राह्मणम् – ५/३२

[११] जैमिनीयन्यायमाला – १/१/२८

[१२] बबरः प्रावाहणि रकामयत – तै. सं– ७/१/१०/२

[१३] जैमिनीयन्यायमाला – १/१/३१

[१४] पाणिनीयधातुपाठे दिवादिगणे।

[१५] ब्रह्मसूत्रम् – १/१/३

सूत्रं सूत्रयति। अर्थात् ऋग्वेदादिशाखाणां मनुष्यनिर्माणप्रमाणाभावात् नित्यत्वं सिध्यति। देवताधिकरणेऽपि सूत्रितम् 'अत एव च नित्यत्वम्'[१६] इति। तथैव ब्रह्मसूत्रशाङ्करभाष्ये उल्लिखितं वर्तते यत् –

अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।
आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ॥[१७] इति ।

केचन आक्षिपन्ति वेदानां शब्दमयत्वान्नित्यत्वं न सम्भवति। तस्मात् शब्दाः अनित्यत्वे वेदानामपि अनित्यत्वं स्वीकार्यम्। अस्मिन् प्रसङ्गे महाभाष्यकारः पतञ्जलिमुनिः कथयति – 'नित्याः शब्दा नित्येषु शब्देषु कूटस्थैरविचालिभिः वर्णैः भावितव्यमनपायोपजन् विकारिभिः इति। अर्थात् वैदिका लौकिकाश्च सर्वे शब्दा नित्याः सन्ति। यतोहि शब्दानां मध्ये कूटस्था विनाशरहिता अचलाः अनपाया अविकारिणो वर्णाः सन्ति। पुनश्च ये परमात्मज्ञानस्थाः शब्दार्थसम्बन्धाः सन्ति ते नित्याः सन्ति। वाक्यप्रदीये वर्णयति यत् प्रत्येकेन ज्ञानेन सह सूक्ष्मरूपेण शब्दस्य साहाय्यं विद्यत एव । भाषाप्रयोगे शब्दानामुपयोगिता वर्तते, यथा – 'न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते'[१८] इति। ज्ञानजन्या भवेदिच्छा इच्छाजन्या भवेत् कृतिः। सृष्टिनिर्माणाय ईश्वरोऽपि ज्ञानेनैव विचारं कृत्वा कर्म सम्पादयति। तदर्थं प्रतीयते यत् ईश्वरीयं ज्ञानमेव वेदरूपेण तस्य निःश्वासात् प्रादूर्भूत्। अनेनैव वेदस्याऽपौरुषेयत्वं सिध्यति। जैमिनीनापि शब्दस्य नित्यत्वं स्वीकृतम्। यथा – 'नित्यस्तु स्याद् दर्शनस्य परार्थत्वात्'[१९] इति। अत्र 'तु' शब्देन अनित्यशङ्का निवार्यते।

---

[१६] जैमिनीयन्यायमाला

[१७] कूर्मपुराणम् – २/२८, महाभारत- १२/२२४/५५

[१८] वाक्यपदीये – १/१२३

[१९] जैमिनीयन्यायमाला – १/१

वैशेषिकदर्शनस्य कर्ता आचार्य कणादः अपि वेदस्य नित्यत्वं स्वीकरोति, यथा- 'तद्वचनादाम्नायस्य प्रामाण्यम्'[२०] इति। अर्थात् तद् वचनात् तयोर्धर्मेश्वरयोर्वचनात् धर्मस्यैव कर्तव्यतया प्रतिपादनात् ईश्वरेणैवोक्तत्वाच्चाम्नायस्य वेदचतुष्टयस्य प्रामाण्यं सर्वैः नित्यत्वेन स्वीकार्यम्।

आचार्यगौतममुनिनापि आप्तवचनत्वात् वेदानां नित्यत्वं स्वीकरोति, यथा- 'निजशक्त्यभिव्यक्तेः स्वतः प्रामाण्यम्'[२१] पुनश्च कथ्यते न्यायशास्त्रे- 'मन्त्रायुर्वेदप्रमाणवत् च तत् प्रामाण्यम् आप्तप्रामाण्यात्'[२२] इति।

महर्षिपतञ्जलिः योगशास्त्रे वेदस्य नित्यत्वं स्वीकृत्य कथयति – 'स एष पूर्वेषामपि गुरुः कालेनानवच्छेदात्'[२३] इति। अत्र गुरुः इत्युक्ते ईश्वरः। गृणाति वेदद्वारोपदिशति सत्यान् अर्थान् स गुरुः। स च सर्वदा नित्यः अस्ति। तदुक्तत्वात् वेदानामपि सत्यार्थवत् नित्यत्वं सिध्यति।

वेदस्य दिव्यताम् अपूर्वां शक्तिञ्च वर्णयन् मीमांसभाष्यकारेण शबरस्वामिनोक्तम्- चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवं जातीयकमर्थं शक्नोत्यवगमयितुम्।

वेदभाष्यकारेण सायणाचार्येणोक्तम् सूर्यो यथा स्वप्रकाशेन समग्राणि वस्तूनि बोधयति सुगम्यानि अगम्यानि च तथा वेदाः अचिन्त्यार्थस्य बोधकत्वं भवन्ति। घटपटादयो न स्वयं प्रकाशवन्तः, परन्तु सूर्यचन्द्रमसौ स्वयं प्रकाशितवन्तौ, ताभ्याम् अन्येऽपि प्रकाश्यन्ते। मनुष्याणां स्वस्कन्धारोहणशक्तेरभावात् ते वेदस्याऽपौरुषेयत्वस्य विषये तस्य शक्तेः वस्तूनां प्रतिपादकत्वविषये च अकुण्ठिताबुद्धिः योजयन्ति। अतः वेदाः

---

[२०] वैशेषिकदर्शनम्– १/१/३

[२१] सांख्यसूत्रम् – ५/५१

[२२] न्याय.सू – २/१/६८

[२३] योगसूत्रम्– १/२६

स्वयंप्रकाशवन्तः स्वप्रतिपादकत्वशक्तियुक्ताश्च सन्ति। यथा घटपटादि-द्रव्याणां स्वप्रकाशत्वाऽभावेपि सूर्यचन्द्रादीनां स्वप्रकाशत्वमविरुद्धं तथा मनुष्यादीनां स्वस्कन्धाधिरोहा-सम्भवेऽपि अकुण्ठितशक्तेर्वेदस्य इतरवस्तु-प्रतिपादकत्ववत् स्वप्रतिपादकत्वमप्यस्ति। अतः सायणेन उक्तम्-

**प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।**
**एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता ॥**[२४] **इति।**

अनेनविज्ञायते यत् यानि वस्तूनि प्रत्यक्षप्रमाणेनानुमान प्रमाणेन च न विज्ञायन्ते तानि विज्ञातुं वेदे उपायो विद्यते। एतदर्थं मनु[२५]-व्यास[२६]-जैमिनि-[२७]प्रभृतयः ऋषयः वेदवाण्याः नित्यत्वं दर्शयन्ति। महाभारतानुसारं वेदः नित्यः शाश्वतश्च वर्तते। यदा प्रलयं भवति तदा अन्तर्ध्यानं भूत्वा पुनः सृष्ट्यारम्भे ऋषिभिः प्राप्यते, यथा-

**युगान्तेऽन्तर्हितान् वेदान् सेतिहासान् महर्षयः।**
**लेभिरे तपसा पूर्वमनुज्ञाता स्वयंभुवा ॥**[२८]

सृष्ट्यारम्भे एकैव वेदरासीत्। कालान्तरे वेदस्य कृते त्रयीशब्दस्य प्रयोगो दृश्यते स्म। त्रयी इत्युक्ते ऋग्यजुःसामानि गृह्यन्ते। त्रयो वेदाः त्रयी नाम्ना निगद्यन्ते। श्रूयते यथा-

**तस्माद्यज्ञात्सर्वहुतऽऋचः सामानि यज्ञिरे।**
**छन्दांसि यज्ञिरे तस्माद्यजुस्तस्मादजायत ॥**[२९] **इति।**

---

[२४] ऋग्वेदभाष्यभूमिकायाः मङ्गलाचरणे।

[२५] वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे - मनुस्मृतौ -१/२१

[२६] अत एव च नित्यत्वम् – ब्रह्मसूत्रम् – १/३/२९

[२७] औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः – जैमिनिसूत्रम्- १/५

[२८] महाभारतस्य वनपर्वणि।

[२९] शुक्लयजुर्वेद। – ३१/१०

उपरोक्तमन्त्रेण सिध्यति यत् वेदस्य न कोऽपि कर्ता आसीत्। साक्षात् यज्ञपुरुषात् परमात्मनः शकारात् वेदाः आगताः। यज्ञपुरुषः साकारदेहयुक्तः कोऽपि मनुष्यो न अपितु भगवत् शक्तिः। पुनश्च शतपथब्राह्मणे प्रतिपादितं वर्तते यत् अग्निवायुसूर्याः तपोबलेन ऋग्यजुःसाम्नां ज्ञानम् अर्जितवन्तः। ततस्तेभ्य एतेऽजायन्त[३०]। तदनन्तरं तथैव ऋषयोऽपि तपोबलेन मन्त्रान् दृष्ट्वा अग्रे स्वशिष्यान् पाठितवन्तः श्रुतिपरम्परया। पुनश्च तत्र ब्रह्मपरम्परया प्राप्तं वेदं वेदव्यासो मन्दमतीन् मनुष्यान् विचिन्त्य तत् कृपया चतुर्धाविभज्य ऋग्यजुःसामाथर्वाख्याश्चतुरो वेदान् पैल-वैशम्पायन-जैमिनि-सुमन्तुभ्यः क्रमादुपदिदेश। महाभारतस्या-दिपर्वणि अस्मिन् विषये चर्चा वर्तते।[३१] अनेनैव विज्ञायते यत् वेदोव्यासोऽपि वेदस्य रचना न कृता तस्य विभागः कृतः।

निष्कर्षरूपेण वक्तुं शक्यते यत् वेदाः नित्याः सन्ति सूर्यवत्। यथा सूर्यः स्वप्रकाशेन संसारस्य पर्वतादिपदार्थान् प्रकाशयति तथा वेदोऽपि स्वप्रकाशेन सर्वाविद्याः प्रकाशयति। अतः वेदः अपौरुषेयः, नित्यः, शाश्वतः, त्रिकालाबाध्यश्च वर्तते। यदुक्तं जैमिनीना –

**पौरुषेयं न वा वेदवाक्यं स्यात्पौरुषेयता।**
**काठकादिसमाख्यानाद् वाक्यत्वाच्चान्यवाक्यवत्॥**
**समाख्यानं प्रवचनाद् वाक्यत्वं तु पराहतम्।**
**तत्कर्त्रनुपलम्भेन स्यात्ततोऽपौरुषेयता॥**[३२] **इति।**

---

[३०] तेभ्यततेभ्यस्त्रयो वेदा अजायन्त, अग्नेः ऋग्वेदः, वायोर्यजुर्वेदः, सूर्यात् सामवेदश्च – शतपथब्राह्मणम्।

[३१] विव्यास वेदान् यस्मात् स वेदव्यास इति स्मृतः – महाभारतस्यादिपर्वणि।

[३२] जैमिनीयन्यायमाला – १/१/८

## सन्दर्भग्रन्थाः –

१. वैदिकसाहित्य एवं संस्कृति - डॉ. कपिलदेवद्विवेदी, विश्वविद्यालय प्रकाशन, वाराणसी।
२. शतपथब्राह्मणम् - डॉ. अल्बेर्तन वेबेरेण शोधितम्, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी।
३. ऋग्वेदसंहिता - श्रीमत्सायणाचार्यविरचितभाष्यसमेता, वैदिकसंशोधनमण्डल, पुने, १९०५
४. शुक्लयजुर्वेद संहिता - उवट्ट-महीधरभाष्यसंवलित तत्वबोधिनि हिन्दीव्याख्योपेता, संकलकः पणशीकरोपाह्वो वासुदेवशर्मा, चौखम्बा विद्याभवन, वाराणसी, १९९२
५. निरुक्तम् – छज्जुराम शास्त्री, मेहरचन्द्र लछमनदास पब्लिकेशन्स, नईदिल्ली, १९९३
६. मनुस्मृतिः- सम्पादक पं. गंगानाथ झा, परिमल पब्लि., २००४
७. अथर्ववेदः – सायणभाष्यसहितः, चौखम्बा विद्याभवन, वाराणसी।
८. ऐतरेयब्राह्मणम् – सुखप्रदाख्यवृत्ति सहितम्, नागपब्लिसर्स,१९९१।
९. जैमिनीयन्यायमाला – डॉ. महेन्द्र कुमारपाण्डेय, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी।
१०. माहाभारतम् – मूलमात्र, गीताप्रेस, गोरखपुर, उत्तरप्रदेश।
११. दर्शनशास्त्रम् - एन्. एन् ओझा - चौखम्बा विद्याभवन, वाराणसी।
१२. ईशादि नौ उपनिषद् - गीताप्रेस, गोरखपुर, उत्तरप्रदेश।